# अथ रामाष्टतकम्

सुग्रीवमित्रं परमं पवित्रं सीताकलत्रं नवमेघगात्रम्
कारुण्यपात्रं शतपत्रनेत्रं श्रीरामचन्द्रं सततं नमामि

संसारसारं निगमप्रचारं धर्मावतारं हृतभूमिभारम्
सदाऽविकारं सुखसिन्धुसारं श्रीरामचन्द्रं सततं नमामि

लक्ष्मीविलासं जगतां निवासं लङ्काविनाशं भुवनप्रकाशम्
भूदेववासं शरदिन्दुहासं श्रीरामचन्द्रं सततं नमामि

मन्दारमालं वचने रसालं गुणैर्विशालं हतसप्ततालम्
क्रव्यादकालं सुरलोकपालं श्रीरामचन्द्रं सततं नमामि

वेदान्तगानं सकलैः समानं हृतारिमानं त्रिदशप्रधानम्
गजेन्द्रयानं विगतावसानं श्रीरामचन्द्रं सततं नमामि

श्यामाभिरामं नयनाभिरामं गुणाभिरामं वचनाभिरामम्
विश्वप्रणामं कृतभक्तिकामं श्रीरामचन्द्रं सततं नमामि

लीलाशरीरं रणरङ्गधीरं विश्वैकसारं रघुवंशहारम्
गम्भीरनादं जितसर्ववादं श्रीरामचन्द्रं सततं नमामि

खले कृतान्तं स्वजने विनीतं सामोपगीतं मनसा प्रतीतम्
रागेण गीतं वचनादतीतं श्रीरामचन्द्रं सततं नमामि

इति श्रीशिवप्रोक्तं रामाष्टतकं संपूर्णम्